# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-1)(New)** | **प्रश्नपत्रम् – 7** | गुणाः –70 |
| विषयः – रामानुजवेदान्तः | **कोड –C.E.1.1.1** | समयः- 11:30 तः 2:30पर्यन्तम् |
| दिनाङ्कः –16/10/2019 | सन्दर्भग्रन्थः – यतीन्द्रमतदीपिका | |

**प्र. क्र.** **प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ कयोश्चिद् द्वयोः प्रश्नयोः व्याख्यात्मकमुत्तरं लिखत।** १०

१ प्रमाणस्य लक्षणं विवेचयत।

२ लक्षणस्य दोषत्रयं निरूपयत।

३ विशिष्टाद्वैतसन्निकर्षविचारं स्पष्टयत।

**प्रश्न २ कस्यचिदेकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ प्रत्यक्षप्रमाणलक्षणस्य विवेचनं कुरुत।

२ ख्यातिपञ्चकं वर्णयित्वा यथार्थ ख्यातिं विशदयत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ कयोश्चिद् द्वयोः प्रश्नयोः व्याख्यात्मकमुत्तरं लिखत।** १०

१ अनुमितिलक्षणं विलिख्यानुमानलक्षणं प्रतिपादयत।

२ व्याप्यं सभेदं निरूपयत।

३ वेदस्य अङ्गानि सविशदं प्रतिपादयत।

**प्रश्न ४ कस्यचिदेकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ पाठ्यग्रन्थदिशा हेत्वाभासान् प्रतिपादयत।

२ शब्दप्रमाणं यथाग्रन्थं वर्णयत।

**तृतीयान्वितिः (Unit 3)**

**प्रश्न ५ कयोश्चिद् द्वयोः प्रश्नयोः व्याख्यात्मकमुत्तरं लिखत।** १०

१ पञ्चतन्मात्राणां निरूपणं विधेयम्।

२ ब्रह्मणोऽह्नो वर्णनं कार्यम्।

३ नित्यविभूतेः दिव्यताया वर्णनं कुरुत।

**प्रश्न ६ कस्यचिदेकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ पञ्चीकरणप्रक्रियां यथाग्रन्थं प्रतिपादयत।

२ पाठ्यग्रन्थदिशा नित्यविभूतिं निरूपयत।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानाम् लघूत्तराणि लिखत।** १०

१ श्रीवेङ्कटेशस्मिति मंगलाचरणं लिखत।

२ प्रमाणानि कति सन्ति? कानि च तानि?

३ प्रमेयं कतिविधम्? किञ्च तत्?

४ अद्रव्यं कतिविधम्? किञ्च तत्?

५ प्रमायाः लक्षणं किम्?

६ व्याप्तिः कतिविधा? का च सा?

७ अनुमानस्यावयवपञ्चकं किम्?

८ सन्ध्योपासनादिविधिः कः?

९ राजसानि पुराणानि कानि सन्ति?

१० कस्मादहंकार उत्पद्यते?

११ इन्द्रियस्य लक्षणं किम्?

१२ पञ्चभूतानि कानि सन्ति?

१३ मनुष्यमानेन संवत्सरः केषां दिनं भवति?

१४ नित्यविभूतिनिरूपणं कस्मिन्नवतारेऽस्ति?

१५ यतीन्द्रमतदीपिका केन विरचिता?